# શ્રીરમણલહરી

shrIramaNalaharI

sanskritdocuments.org

January 6, 2018

shrIramaNalaharI

શ્રીરમણલહરી

## Sanskrit Document Information

Text title : ramaNalaharI

File name : ramaNalaharI.itx

Category : laharI, deities_misc, gurudev, ramana

Location : doc_deities_misc

Author : Narendrakesarisharma

Transliterated by : Sunder Hattangadi sunderh at hotmail.com

Proofread by : Sunder Hattangadi sunderh at hotmail.com

Latest update : January 6, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

January 6, 2018

*sanskritdocuments.org*

# શ્રીરમણલહરી

॥ નમો ભગવતે શ્રીમતે રમણાય ॥

યતો જન્માદ્યસ્ય પ્રભવતિ ચ યઃ કૂટનિલયો
મુદા યન્માહાત્મ્યં પ્રણિગદતિ નિત્યં શ્રુતિગણઃ ।
શિવં શુદ્ધં શાન્તં નિરવધિસુખં સત્યમમલં
પરં વન્દેઽહં તત્કિમપિ રમણાખ્યં ચિતિમહઃ ॥ ૧॥

મતો હૃત્પદ્મોસાવરુણગિરિરાજોઽખિલભુવો
યદન્તશ્ચૈતન્યં તદિહ રમણો દક્ષિણગતઃ ।
સતાં સર્વેષાં યો હૃદિ હિ રમતે સ્વાત્મકલયા
નમસ્તસ્મૈ ભૂમ્ને હૃદયરમણાયાનવરતમ્ ॥ ૨॥

જડં દેહં નશ્યદ્ઘટપટનિભં ચિદ્વિરહિતં
તતો નાહં તદ્યન્ન હિ ભવતિ સુપ્તૌ પ્રતિદિનમ્ ।
અતઃ કોઽહં તત્ત્વં ત્વિતિ વરધિયાન્વેષિતવતઃ
સતઃ સોઽહંસસ્ફૂર્તિર્હૃદરુણગિરૌ ભાતિ રમણઃ ॥ ૩॥

મનઃસઙ્કલ્પોઽયં ત્રિભુવનમયો દૃશ્યનિચયો
મમૈતે સઙ્કલ્પા ઇતિ શિતધિયાઽઽલોક્ય સતતમ્ ।
અહં કો વેત્યન્તર્હૃદિ નિજવિમર્શે પરિણતે
ચિદાનન્દઃ સોઽહં સ્ફુરતિ ભગવાંસ્તત્ર રમણઃ ॥ ૪॥

જરાદ્યૂર્મિવ્રાતાઽઽકુલવિષમસંસારજલધે-
સ્ત્રિધાતપ્તાઞ્જીવાન્નરમૃગખગાદ્યાન્કરુણયા ।
સમુદ્ધર્તું શોણાચલતટનિવાસી કલિયુગે
સદાનન્દઃ સિદ્ધો જયતિ રમણાખ્યઃ સ ભગવાન્ ॥ ૫॥

અહિંસાસિદ્ધાન્તપ્રણિહિતદયાધર્મસયુજાં
યતીનાં બૌદ્ધાનાં જિનદશવલાખણ્ડમતિનામ્ ।

ચિશૂપદ્ભક્તાનાં તદનુ રમણેશાન ભગવન્
જિનોઽસિ ત્વં બુદ્ધઃ ક્રમશ ઇહ હીશામસિરસિ ॥ ૬॥

કુરાનધ્યેત્રીણામિહ જગતિ મોહમ્મદગુરોઃ
સમાગચ્છન્તીનાં શમિતમનસેસ્લામવિધિતઃ ।
પ્રજાનાં સમ્પ્રાપ્યં યદુત પરમં દૈવમુદિતં
ખુદાચાલાહસ્ત્વં રમણભગવન્નોમતનુમન્ ॥ ૭॥

પદાર્થાનૂચે ગૌતમમુનિવરઃ ષોડશતયા
કણાદસ્સમૈવેત્યવદદથ વૈશેષિક ઋષિઃ ।
પદાર્થાનામેષાં ત્રિગુણવિકૃતાનામણુભુવાં
પરં પારં બ્રહ્મંસ્ત્વમસિ રમણાશેષરમણ ॥ ૮॥

અનાદી પ્રોક્તૌ હિ પ્રકૃતિપુરુષૌ વિશ્વજનકૌ
યયોર્ભેદજ્ઞાનાદ્ભવતિ મનુજો મુક્તપુરુષઃ ।
ઇદં સાઙ્ખ્યં જ્ઞાનં સમકથયદાદૌ તુ કપિલ-
સ્ત્વમેવૈતત્તત્ત્વં પરમમસિ કૈવલ્યરમણ ॥ ૯॥

અહિભ્રાન્તીરજ્જ્વાં રજતધિષણા શુક્તિપુટકે
તથૈવં ચિદ્રૂપે નિરવધિસુખે વિશ્વકલના ।
ઇતીદં યત્તત્ત્વં પરમસુખદં શાઙ્કરમતે
તદદ્વૈતં ધામ ત્વમસિ ભગવત્પાદ રમણ ॥ ૧૦॥

જગદ્રઙ્ગે ચિત્રે લલિતપટમાલ્યાદિલસિતે
નટાસ્ત્વેતે સર્વે સ્થલજલખગાઃ પ્રાણિનિવહાઃ ।
મહામાયાઽજા યા ચપલચપલા સૈવ સુનટી ।
મહાસૂત્રાચાર્યો રમણ સકલં ત્વં ભ્રમયસિ ॥ ૧૧॥

ત્વમગ્નિસ્ત્વં સોમસ્ત્વમસિ પવનસ્ત્વં જલમસિ
ત્વમર્કસ્ત્વં પૃથ્વી વિયદપિ મહત્તારકગણઃ ।
તથા વિશ્વે દેવાસ્ત્વમસિ વરુણસ્ત્વં સુરપતિ-
ર્યમો રુદ્રોઽસિ ત્વં રમણ ધનદો ગીષ્પતિરસિ ॥ ૧૨॥

જગત્સ્રષ્ટા બ્રહ્મા ભવસિ ભગવન્ સૃષ્ટિસમયે
જગત્ત્રાતા વિષ્ણુસ્ત્વમસિ કિલ વિશ્વમ્ભરવપુઃ ।
મહાદેવોઽસિ ત્વં નિખિલભવસંહારવિભવ-
સ્ત્રયોઽપ્યેતે દેવાસ્તવ રમણ લીલાવિલસિતાઃ ॥ ૧૩॥

શિવસ્ત્વં શૈવાનાં હરિરસિ મુકુન્દાઙ્ઘ્રિસુહૃદાં
ભવાની શાક્તાનાં ગણપભજકાનાં ગણપતિઃ ।
રવિસ્ત્વં સૌરાણામસિ હુતવહસ્ત્વં હિ યજતાં
દ્વિજાનાં સાવિત્રી વદ રમણ કિં કિં ન ભવસિ ॥ ૧૪॥

મણિદ્વીપે નીપોપવનગતચિન્તામણિગૃહે
સમાસીના પાશાઙ્કુશ વરભયાપોહનભુજા ।
ત્રિણેત્રા રક્તાભા શશધરકિરીટાઽતુલકૃપા
સ્મિતાસ્યા કિં ન ત્વં રમણ ભુવનાધીશ્વરવધૂઃ ॥ ૧૫॥

પિતા પાતા નેતા ત્વમસિ વિષમે સાધનપથે
પ્રભો માતાઽસિ ત્વં હ્યનુપમદયામૂર્તિરમલા ।
ગુરુસ્ત્વં ચોદ્ધર્તા સુખરહિત સંસારજલધે-
સ્ત્રિરૂપો ભાસિ ત્વં રમણભગવંસ્તે પદજુષામ્ ॥ ૧૬॥

મુમુક્ષૂણાં માન્યા ત્વમસિ ભગવન્મુક્તિલતિકા
સુખેચ્છૂનાં નૃણાં ત્વમસિ સુખસોપાનપદવી ।
મખાસક્તાનાં ત્વં હ્યસિ વિવૃતવૈતાનકવિધિ-
સ્તપોનિષ્ઠાનાં ત્વં રમણ મહિતઃ સિદ્ધિમહિમા ॥ ૧૭॥

નિરાકારોઽપિ ત્વં ભવસિ વિવિધાકારવિભવ-
સ્ત્વમદ્વૈતી દ્વૈતી નનુ લસસિ વિશ્વાત્મકતનુઃ ।
ત્વમેકોઽનેકાત્મા સ્ફુરસિ નિખિલાકારરુચિરઃ
પ્રકાશોઽદૃશ્યશ્ચ ત્વમસિ રમણાચાર્ય ભગવન્ ॥ ૧૮॥

વિરાડગ્નિર્વિશ્વસ્ત્વમસિ મહસા જાગ્રતિ તથા
હિરણ્યાન્તઃ સ્વપ્ને ભવસિ પવનસ્તૈજસ ઇતિ ।
સુષુપ્તાવીશસ્ત્વં દિનકરતનુઃ પ્રાજ્ઞ ઉદિત-
સ્તુરીયે ધામ્નિ ત્વં રમણ હૃદયે હ્યોમિતિ પદમ્ ॥ ૧૯॥

મનો ન ત્વં બુદ્ધિર્ન ભવસિ તથા નેન્દ્રિયગણ-
સ્ત્વહઙ્કારો ન ત્વં પ્રકૃતિરસિ ન ત્વં ન વિકૃતિઃ ।
અવિદ્યાઽનાદિસ્ત્વં ન ભવસિ ન દૃગ્દૃશ્યનિચય-
શ્ચિદાનન્દઃ સત્યં ત્વમસિ પરમં બ્રહ્મરમણ ॥ ૨૦॥

વસિષ્ઠો નૈવ ત્વં ભવસિ ન તથા ગૌતમમુનિ-

ર્ભરદ્વાજોऽત્રિસ્ત્વં ન હિ બહુમતઃ કૌશિક ઉત ।
ન વા મારીચસ્ત્વં સુભગ જમદગ્નિસ્ત્વમપિ નો
મહઃ સપ્તર્ષીણામથિ રમણ લોકોત્તરમસિ ॥ ૨૧॥

કલેર્દોષાન્નાનાકલુષમતિપાષણ્ડકલિતે
વિધર્મેऽસ્મિન્વિશ્વે પિબતિ તવ વાક્યામૃતકણાન્ ।
જનૌઘઃ સર્વોऽપિ શ્રવણબલતસ્તૃપ્તિમયતે
પ્રભાવઃ સમ્પૂર્ણસ્તવ રમણ જાગર્તિ જગતિ ॥ ૨૨॥

અહો ધન્યેયં તે જનનવશતો ભારતમહી
હ્યવાચી દિગ્ધન્યા તવ પદસરોજાઙ્કનવશાત્ ।
શિવાકારો ધન્યસ્ત્વરુણગિરિરુત્તુઙ્ગ શિખરો
મહર્ષે યત્ર ત્વં વિહરસિ સતામાપ્ત રમણ ॥ ૨૩॥

સુરાઃ સિદ્ધાઃ સાધ્યા યમનિયમયુક્તાઃ સુતપસઃ
સુરર્ષિબ્રહ્મર્ષિપ્રભૃતય ઉતાન્યે ચ યમિનઃ ।
મુહૂર્તે બ્રાહ્મે તુ શ્રુતિમધુરનાનાસ્તુતિપરાઃ
નમન્તિ ત્વાં બ્રહ્મન્ રમણ કરુણાપૂર્ણજલધે ॥ ૨૪॥

સ્ફુરચ્છાન્તિજ્યોત્સ્નાતુલિતશિવકૈલાસમહિમા
લસત્કૈવલ્યશ્રીહસિતહરિવૈકુણ્ઠગરિમા ।
વિરાગૈશ્વર્યાભાસુવિજિતસુધાસાગરયશાઃ
કૃપાબ્ધેઃ શોણાદ્રૌ જયતિ રમણસ્યાશ્રમવરઃ ॥ ૨૫॥

કપોલે વામે સ્વં કરકમલમાધાય વિમલે
શયાનશ્ચોત્તાનં ક્ષિતિજગતનેત્રાબ્જયુગલઃ ।
ઋષિઃ શાન્તઃ સોऽહંસ્ફુરણપરમાનન્દમુદિતઃ
શિવઃ પૂર્ણઃ સાક્ષી જયતિ રમણઃ શોણકટકે ॥ ૨૬॥

સ્મિતં વક્ત્રે શુભ્રં કરકમલમુદ્રા સુખકરી
સ્વભાવસ્થૌ પાદૌ નિજસહજભાવસ્થિતમનાઃ ।
વસાનઃ કૌપીનં ધવલમવધૂતાખિલતમાઃ
પરાત્મા શોણાદ્રૌ રમણભગવાન્ભાતિ ભયહૃત્ ॥ ૨૭॥

કટાક્ષક્ષેપસ્તે હરતિ હૃદયધ્વાન્તમખિલં
દયાદૃષ્ટિઃ પૂર્ણા પ્રકટયતિ વિજ્ઞાનમિહિરમ્ ।
દદાતીષદ્ધાસ્યં પ્રણતમનુજાયાત્મપદવી-

મમેયસ્તે ધન્યો રમણમહિમા વાગવિષયઃ ॥ ૨૮॥

રકારોઽગ્નિર્બ્રહ્મન્ દહતિ સહસા સઞ્ચિતમલં
મકારશ્ચન્દ્રોઽયં હરતિ તપનં સિઞ્ચતિ સુધામ્ ।
ણકારશ્ચાર્કો હન્ત્યલઘુ નિબિડાજ્ઞાનતિમિરં
વિભૂતિસ્ત્વન્નામ્નો જયતિ રમણેશાન જગતિ ॥ ૨૯॥

સમુદ્ધર્તું લોકાન્કલિમલહતાંસ્તપ્તહૃદયાન્
સુરાણાં સેનાનીઃ સદયમવતીર્ણસ્ત્વમધુના ।
અવેક્ષ્ય પ્રત્યક્ષં રમણભગવંસ્ત્વામનુજગૌ
કવિઃ કણ્ઠેકાવ્યો ગણપતિમુનિસ્સૂરિતિલકઃ ॥ ૩૦॥

પ્રસાદાત્સમ્પ્રાર્થ્યાદપિ સુરવરેભ્યસ્તવ કૃપાં
પરં મત્ત્વા છિત્ત્વા તૃણમિવ નિજાજ્ઞાનનિગડમ્ ।
વિનિદ્રશ્ચિદ્રૂપે નિરવધિસુખે મજ્જતિ સુધીઃ
સ પુણ્યાનાં મન્યે રમણ પરિણામઃ પરગુરો ॥ ૩૧॥

અસારે સંસારે વિષયમૃગતૃષ્ણાભ્રમિતધી-
શ્ચરન્નાનાયોનૌ પ્રબલતરસત્કર્મવશતઃ ।
ઇદાનીં સમ્પ્રાપ્તશ્ચરણકમલં તે ભયહરં
મહર્ષે બ્રહ્મર્ષે રમણભગવસ્ત્વં હિ શરણમ્ ॥ ૩૨॥

ફલાસક્તઃ કુર્વન્વિવિધમનિશં કર્મ બહુધા
ભ્રમન્નાનાતીર્થં ભુવિ બત પઠઞ્છાસ્ત્રનિકરમ્ ।
અશાન્તઃ સર્વત્રાવિદિતનિજરૂપોઽહમધુના
શરણ્યં પ્રાપ્તસ્ત્વાં રમણભગવંસ્ત્વં હિ શરણમ્ ॥ ૩૩॥

જપન્નાનામન્ત્રાન્સ્તવમપિ સુરાણાં વિરચયન્
લિખન્યન્ત્રાંસ્તાન્ત્રં મતમપિ વિશન્વૈદિકમુત ।
સ્વરૂપાજ્ઞાનેન પ્રબલતમસાચ્છાદિતમતિ-
સ્ત્વયાભાસાં ધામ્ના સદયમવલોક્યોઽહમધુના ॥ ૩૪॥

મહામોહેનાહો વિષમવિષયાનેવ ભજતઃ
સ્વતત્ત્વાવસ્થાનં ત્યજત ઉદયે દુર્લભતમમ્ ।
વિહાયાન્તર્દૃષ્ટિં બહિરવિરતં ધાવત ઇહ
પ્રભો ક્ષન્તવ્યં મે રમણ ચપલસ્યાપચરિતમ્ ॥ ૩૫॥

ત્રયી જ્ઞાનં યોગસ્ત્વતિ વિદિતમાર્ગત્રયપરા
યથેચ્છં ગચ્છન્તુ સ્વરુચિમનુસૃત્યાત્ર મનુજાઃ ।
અહં તુ ત્વત્પાદામ્બુજશરણદીક્ષાવિમલધી-
ર્જગત્સર્વં લોકે રમણભગવન્સ્વપ્નસદૃશમ્ ॥ ૩૬॥

પથઃ સર્વાન્હિત્વા ભ્રમણપરિતપ્તઃ શ્રમયુતઃ
પ્રપન્નોઽહં ભક્તઃ પદસરસિજં તે હ્યભયદમ્ ।
શરણ્યઃ શક્તો માં રમણભગવન્નોદ્ધરસિ ચે-
ત્ત્વદન્યં કં લોકે શરણમધુના યામિ કથય ॥ ૩૭॥

નિબદ્ધં હૃદ્ગ્રન્થિં મમ સપદિ સમ્ભેદય વિભો
સમસ્તં સઞ્છિન્ધિ ત્વમથ ભગવન્ સંશયમપિ ।
ક્ષયં દ્રાક્સર્વાણિ પ્રણય મમ કર્માણિ દયયા
પરં ત્વં સ્વાત્માનં પ્રથય રમણેશાન હૃદયે ॥ ૩૮॥

ત્વમાત્મા વિશ્વેષાં હૃદયકુહરે ભાસિ વિમલઃ
પરાત્મંસ્તે દિવ્યં પદસરસિજદ્વન્દ્વમધુના ।
પ્રપન્નોઽસ્મિ બ્રહ્મન્ ગુરુરમણ માં શાધિ કૃપયા
યથાહં ગચ્છેયં ભવજલધિપારં તવ પદમ્ ॥ ૩૯॥

અહં દૈન્યાગારસ્ત્વમસિ વિભવાનાં જનનભૂ-
ર્મહામૂઢોઽહં ત્વં હ્યસિ નિખિલવિજ્ઞાનનિલયઃ ।
પિપાસાશ્રાન્તોઽહં ત્વમસિ શિવપીયૂષલહરી
ગુરુસ્ત્વં શિષ્યોઽહં રમણભગવન્પાહિ દયયા ॥ ૪૦॥

કરાલે સિંહાસ્યે યદિ પતતિ હા પ્રાણિનિકરઃ
પ્રણષ્ટો નિર્જીવો ભવતિ વિકલશ્ચ પ્રકૃતિતઃ ।
તવાચાર્યસ્યૈવં હ્યમલકરુણાદૃષ્ટિકલયા
ભવેન્નષ્ટો જીવો ભુવિ રમણ મન્યેઽદ્ભુતમિદમ્ ॥ ૪૧॥

મુમુક્ષુર્જિજ્ઞાસુર્ય ઇહ મનુજઃ પૂર્વસુકૃતૈઃ
શ્વપાકો ગોરુણ્ડો યવનકુલજો વા ભવતુ કિમ્ ।
સ યાતિ ત્વદ્વક્ત્રપ્રસરદુપદેશાત્મસુધયા
પરં મૃત્યોઃ પારં રમણ તવ સામ્યં ચ ભજતિ ॥ ૪૨॥

સભાષ્યં સિદ્ધાન્તં તવ મહિતસદ્દર્શનગતં
હૃદા પાયં પાયં રમણભગવન્ પણ્ડિતગણઃ ।

પ્રહૃષ્ટસ્તૃપ્તાત્મા ભવતિ ગતસન્દેહતિમિરો
ન કસ્મૈ ત્વદ્વાણી દિશતિ શિવકૈવલ્યપદવીમ્ ॥ ૪૩॥

કુતોઽયં સંસારઃ પ્રભવતિ કુતોઽજ્ઞાનતિમિરં
કુતો જીવેશાનૌ ભવતિ કથમદ્વૈતધિષણા ।
સ્વતત્ત્વસ્ય જ્ઞાને કિમિહ ગુરુશિષ્યત્વકથનં
ચિદાનન્દાકારે જયતિ રમણે શ્રીભગવતિ ॥ ૪૪॥

અનિત્યે લોકેઽસ્મિન્નસુખભરિતેઽવાપ્ય જનનં
પરં નિત્યં સત્યં હૃદયરમણં શાશ્વતસુખમ્ ।
ભવન્તં પ્રાપ્તા યે રમણભગવન્ પુણ્યપુરુષાઃ
કૃતાર્થત્વં તેષાં કથમિવ કવીન્દ્રઃ કથયતુ ॥ ૪૫॥

વિદિત્વા યં દેવં તરતિ ભુવિ મૃત્યું તનુધરો
યતો નાન્યઃ પન્થા ઇતિ ભણતિ મુક્ત્યૈ શ્રુતિરપિ ।
ત્વમેવાયં દેવો હૃદયરમણઃ સર્વજગતાં
મહાત્મન્ત્સમ્પૂજ્યે જગતિ મહિમા તે વિજયતે ॥ ૪૬॥

વિના સ્વાત્મજ્ઞાનં ક્વચન મનુજઃ કોઽપિ વિમલાં
કદાચિદ્ધાત્ર્યુર્વ્યાં કથમપિ ન નિર્વાણપદવીમ્ ।
ઇતિ જ્ઞાનજ્યોતિઃ પ્રકટિતવતો ભારતભુવિ
પ્રભા તે બ્રહ્માણ્ડે રમણ લસતીશાનયશસા ॥ ૪૭॥

અહં બ્રહ્માસ્મીતિ શ્રુતિહૃદિ વચસ્તત્ત્વમસિ ચે-
ત્યયં હ્યાત્મા બ્રહ્મેત્યપિ ગદિતમિત્થં યદમલમ્ ।
ચિદાનન્દઃ સત્યં તદસિ રમણ બ્રહ્મ પરમં
હ્યહં ત્વં ત્વં ચાહં નનુ રમણ નાનાસ્તિ કિમિહ ॥ ૪૮॥

પરં બ્રહ્માનન્દં વિમલમનઘં શાશ્વતમજં
શિવં પૂર્ણં શાન્તં પરમશુભરૂપં હ્યભિનવમ્ ।
પ્રપઞ્ચાતીતં શં ત્રિગુણરહિતં નિત્યમુદિતં
મહર્ષિં વન્દે શ્રીરમણભગવન્તં હૃદિ મુદા ॥ ૪૯॥

નમસ્તે પૂર્ણાય ત્રિભુવનમયાયાખિલવિદે
નમસ્તે નિત્યાય પ્રકૃતિરહિતાયાત્મમહસે ।
નમસ્તે શુદ્ધાય પ્રણતજનનાથાય વિભવે
નમસ્તે ભૂમ્ને શ્રીરમણગુરવે શ્રીભગવતે ॥ ૫૦॥

નમો મહ્યં કર્ત્રે નિખિલભુવનાધારવપુષે
નમો મહ્યં જ્ઞાત્રે વયુનમયરૂપાય કવયે ।
નમો મહ્યં ધાત્રે નગવરનિવાસાય મુનયે
નમો મહ્યં ભર્ત્રે હૃદયરમણાયેહ સતતમ્ ॥ ૫૧॥

વિશેષાર્થા લધ્વી "નરપતિમૃગેન્દ્રેણ" ભણિતા
પુનાના સ્વાત્માનં રમણલહરીયં વિજયતે ।
અનેન સ્તોત્રેણ સ્મરતિ રમણં યઃ શુભમતિઃ
પ્રસાદસ્તસ્યાસ્ય પ્રવહતિ પરસ્યાખિલગુરોઃ ॥ ૫૨॥

ઇતિ શ્રીનરેન્દ્રકેસરિશર્મપ્રણીતા શ્રીરમણલહરી ॥

શ્રીરમણાર્પણમસ્તુ ॥

Encoded and proofread by Sunder Hattangadi sunderh hotmail.com

*shrIramaNalaharI*

pdf was typeset on January 6, 2018

Please send corrections to *sanskrit@cheerful.com*